श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्) संस्कृतभाषायां अनुवाद्य अनुगृहीतं श्रीमद्वेदान्ताचार्यविरचितम्

# ॥ अडैक्कलप्पत्तु ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ अडैक्कलप्पत्तु ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

भक्त्यादावनवाप्तसुस्थितिरटन् सर्वत्र धावन् यथा
श्रान्त स्सन् पतितो रघूत्तमपदे काक स्तथा सप्तसु।
मुक्तिप्राप्तिकरीषु पूर्षु महिते काञ्चीपुरे दीव्यतः
हस्तीशस्य कृपैकलक्ष्य मधुना भूत्वा त माशिश्रिये॥ १ ॥

कपर्दिचतुराननप्रभृतयः स्वकर्मानुगाः
भवन्ति चलवैभवा इति विलोक्य पद्माजुषः।
गजाचलमहेशितुः प्रथितकाञ्चिपूर्वासिनः
दयाब्धिवरदप्रभोः शरणमेमि पादद्वयम्॥ २ ॥

तन्त्रै रन्यैर्विना स्वस्वसरणिमविनाश्यैव मन्त्रै स्तथोक्तैः
वैलक्षण्यं च सूक्तैः सुविशद मवलोक्यैव पादौ नमन्ति।
कारुण्योद्वर्षिणोऽस्मास्वखिलतनुयुतेष्वस्य देवाधिनेतुः
हस्तिक्षोणीधराधीश्वरवरदविभोः शीलतोऽन्यन्न जाने॥ ३ ॥

काकक्रव्यादपाण्ड्वात्मजनृपरमणीक्षत्रबन्धुद्विपेन्द्र-
स्थाणुब्रह्मादिबृन्दारकपुरनिलयेभ्य स्सुखेष्वग्र्यभाजम्।
मोक्षं चानन्दपूर्णं ददत मिह दयां प्रेक्ष्य पूर्णां तदीयां
नागागाधीशदेवाधिपवरदपदाम्भोजयुग्मं प्रपद्ये॥ ४ ॥

श्रीशोल्लासक्रिया या विदधदतिमुदा सञ्जिहानोऽनभीष्टाः
सम्बन्धौघं गुणौघं समधिक मनुभूयैव विश्वासकाष्ठाम्।
श्रेष्ठां संप्रार्थ्य रक्षां जगति गतिधुतो नैव चक्रे तपोऽहं
काञ्च्यां सालावृतायां वरद मुरुदयं रक्षितारं प्रपद्ये॥ ५ ॥

www.prapatti.com

प्राज्ञा ये शरणं गता अनुययुर्ये वा तदुक्त्या दृढं
ये वैतादृशतारकोक्तिदकृपा मेवैत्य चेरु स्तपः।
चौर्यस्याकरणात् स्वका इम इति प्रीत्याङ्ग्यकुर्वंश्च ये
तेषां गोप्तरि मां दयाळुवरदे न्यस्ये तुलस्यद्वहे॥ ६ ॥

भवत्पदयुगं श्रये त्विति सकृत् प्रवक्तृनलं
प्रतीत इति बोधयन्निव करं प्रदर्श्याभयम्।
वितीर्य सकलं स्वकं स्वयमतीव यो राजते
दयाळु वरदप्रभोः पदयुगं च तस्याश्रये॥ ७ ॥

विश्वासान्यूनतायै उपचितफलपूर्त्यै च दुष्कर्मलब्धां
सत्यांशाविस्मृतिं तां निरसयितु मवाप्तोपलब्धौ प्रतुष्ट्यै।
शैतल्याहीनतायै विधरणकरणार्थं प्रशान्त्यै दयाळोः
सौन्दर्योपासिमूर्तेः करिगिरिकमितुः किं गिरो विस्मरामि॥ ८ ॥

क्षणे च निगमार्थवित्सुमनसां विशुद्धोक्तिभिः
शुभा रविधियां च ता स्सुकलयन् गुरूणां गिरः।
विनाश्य धिषणासिना विशय मात्मनः प्राणमं
रवीन्दुनयनस्य तत्पदयुगं गजाद्रीशितुः॥ ९ ॥

लक्ष्म्यां दिव्याकृतौ तन्निरवधिकरुणानिर्मलज्ञानयोश्च
संसाध्ये स्वानुबन्धे त्वमितजनपदैश्वर्यपूर्णे प्रणाशे।
रक्षायां सर्गकार्येऽप्यनुदितकलुषाकाररीत्या स्थितस्य
सुस्थे लक्ष्ये विलग्न श्शर इव वरदस्यानुकम्पावतोऽहम्॥ १० ॥

उपायोऽन्यो न स्यात् फलमपि रमेशादिति विदां
प्रपत्ति स्सर्वेषां फलमपि तदीयं सकृदिमे।
कदाचिद्वोपायः फलमिति च मत्वैव पदयोः
कृपाळोः प्रोक्तं सद्गुणिदशक मेतद्धिकलुषम्॥ ११ ॥

श्रीदेशिकप्रबन्धस्थ-
प्रपत्तिदशकस्य हि।



www.prapatti.com

गोपालार्यो लिलेखार्थ-
तात्पर्ये श्लोकसंयुते॥

॥ इति अडैक्कलप्पत्तु प्रबन्धः समाप्तः ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

www.prapatti.com